THE JOURNAL OF
THE TANJORE SARASVATI MAHAL LIBRARY

EDITED BY

S. GOPALAN, B. A., B. L.,

Hony. Secretary, T. M. S. S. M. Library.

Vol. IX

No. 2

Published with the permission of
The Administrative Committee of the Library.

1954

Annual Subscription Rs. 2. Single Copy As. 12

LIST OF PUBLICATIONS OF

THE TANJORE MAHARAJA SERFOJI'S
SARASWATI MAHAL LIBRARY, TANJORE.

Sanskrit Publications.

1.	Gita Govinda of Jayadeva with Abhinaya		2	0
2.	Ayurvedamahodadhi—Annapanavidhi of Sushena		1	4
3.	Dharmakutam - (Sundara Kanda)	Half Calico	4	0
		Full Calico	4	8
4.	Jatakasaradipa by Nrisimha	Calico	14	0
		Ordinary	13	8
5.	Vishnutattva Deepika of Varkhedi Timmannacharya		2	0
6.	Sangeeta Darpanam of Chatura Damodara		3	0
7.	Bijapallavam (In the Press)		......	
8.	Sahendra Vilasam By Sridhara Venkatesa (AYYAVAL)		3	0
9.	Chola Champu Edited by Dr. V. Raghavan, M. A. PH D.		1	0
10.	Aswasastram with coloured illustrations	Rs. 14 ; 11 ; 10 and	9	0
11.	Samrajya Lakshmi Peethika		8	0

Sanskrit—English—Publications.

12.	Mudrarakshasa Nataka Katha of Mahadeva		2	8

Sanskrit—English—Tamil Publications.

13.	Viswakarma Vastu Sastram with commentary (In the Press)		......	

Sanskrit—Tamil Publications.

14.	Rajamriganka with Tamil Translation		2	8
15.	Anandakandam with Tamil Translation		15	0
	Sanskrit alone.		10	8
	Tamil Translation alone.		5	8
16.	Nadee Chakram with Tamil meaning (In the Press)		......	

Sanskrit—Tamil—Marathi—English Publications.

17.	Natya Sastra Sangraha		15	0

Tamil Publications.

18.	Sarabendra Vaidyamurai—Gunma Roga Chikitsai	Half Calico	3	8
		Full Calico	4	

CONTENTS.

No.		Pages
1.	OUR EXCHANGES.	
2.	वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितकृता	
	An Analysis in English by the late P. V. Naganatha Sastri, continued from Vol. IX. No. 1.	~~27—40~~ 43-46
3.	श्रीशिवपादकमलरेणुसहस्रे— दयापद्धतिः	24—25
	,, लक्ष्मीपद्धतिः	26—27
	,, शैशवपद्धतिः	28—29
4.	लक्ष्मीकटाक्षम् — தமிழ் உரையுடன்	17—20
5.	ताननिघण्टुः ।	25—28
6.	पारिजातनाटकम् — श्रीकुमारतातदेशिकप्रणीतम् (द्वितीयोऽङ्कः)	17—34
7.	A note on The New Edition of Daṇḍin's Avantisundarī	1—4
8.	श्रीमद्भगवद्गीता— माधवस्वामिकृत मराठीभाषान्तर	25—38
9.	कविकर्पटिका— श्रीवादीन्द्रकविविरचिता ।	9—15
10.	Review	
11.	Books Received	1—3

OUR EXCHANGES

1. The Indian P. E. N., Bombay.
2. The Divine Life, Sivananda Nagar, Rishikesh, U. P.
3. Mysore Information Bulletin, Govt. of Mysore.
4. Madras Information, Govt. of Madras.
5. The Journal of Oriental Research, Madras.
6. The Journal of University of Bombay.
7. Bulletin of the Govt. Oriental Manuscripts Library, Madras.
8. American Newsfile of the U. S. Information Service.
9. The Journal of the Travancore University Oriental Mss. Library.
10. Agra University Journal of Research, Agra.
11. Tirumalai Tirupathi Devasthanam—Monthly Bulletin.
12. Commonwealth Today.
13. Fortnightly Review of News and Events of the British Information Service.
14. Journal of the Annamalai University, Annamalainagar.
15. The Adyar Library Bulletin, Adyar.
16. Journal of Sri Venkateswara Oriental Institute, Tirupathi.
17. Journal of the Oriental Institute, Baroda.
18. Britain Today.
19. Annals of the B. O. R. Institute, Poona.
20. Sen Tamil. (Tamil) Madurai Tamil Sangam, Madurai.
21. Gnanasambandam. (Tamil) Dharmapuram.
22. Tamil Pozil (Tamil) Karanthai Tamil Sangam, Tanjore.
23. Vaidya Chandrika, (Tamil) Teppakulam, Trichy.
24. Eeelakesari, Ceylon. (Tamil)
25. American Reporter—Tamil and English Editions.
26. Vijayavani—(Telugu) Vijayawada.
27. Kinnera. (Telugu Monthly) 16, Jones St., Madras-1.
28. Traimasik—Bharata Ithihasa Samshodhak Mandal, Poona.
29. Samshodhak, Rajawade Samsodhan Mandir, Dhulia.
30. Quarterly Journal of the Mythic Society, Bangalore.

31. Jaina Siddhantha Bhaskar & Antiquary, Arrah (Bihar)
32. Udyana Patrika, Tiruvaiyaru, Tanjore Dt.
33. UNESCO Bulletin for Libraries.
34. Dharma Chakram, Sri Rama Krishna Tapovanam.
35. Matru Seva, (Telugu weekly) Madras.
36. Sutantiran (Tamil weekly) Colombo.
37. Bulletin of the Ramakrishna Mission Institute of Culture, Calcutta.
38. The Indo-Asian Culture, Pataudi House, New Delhi-1.
39. Sri Ramakrishna Vijayam, Sri Ramakrishna Matam, Madras-4.
40. News Bulletin, Embassy of the People's Republic of China, New Delhi.
41. News from Yugoslavia, Yugoslav Embassy, 13, Sundarnagar, New Delhi.

भोराजन्यविशां वेति वाच्यं ॥ (Vārtika)

It is optional to prolate the last letter whenever the last word is भो or ends in an appellation (generic) appropriate to a vais'ya or kṣatriya.

Thus— आयुष्मानेधि भो३:

आयुष्मानेधीन्द्रवर्मा३न् (To a Kṣatriya)
आयुष्मानेधीन्द्रपालिता३ (To a Vais'ya)

We now proceed to the second group of cases in which a prolated vowel is permissible;

s 73 दूराद्धूते च (8-2-84) S. K. 95. दूरात् संबोधने यद्वाक्यं तस्य टेः प्लुतः स्यात् ॥

When one is called from at a distance, the 'टि' of that sentence may be lengthened. e. g. सक्तून्पिब देवदत्ता ३.

s 74 हैहेप्रयोगे हैहयोः (8-2-85) S. K. 96. एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात् ।

When, however, in calling from a distance, we employ the words है or हे in a sentence, it is only those letters that could be prolated.

e. g. हे ३ राम ! राम ! है ३.

s 75 गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् (8-2-86) S. K. 97. दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात् ।

In calling from a distance, any long letter except ऋ, though not at the end of the sentence may be prolated. दे३वदत्त ॥ देवद३त्त ॥ देवदत्त३ ॥ Why 'long' letters? The short अ following व in the above example cannot be prolonged. Why except ऋ? In कृष्ण3, we cannot prolong the ऋ, although it is long being followed by a conjunct consonant.

PRAGṚHYAS

Pragṛhyas are exempted from combination. Pragṛhya is a technical term whose scope is described from (1-1-11) to (1-1-19) both inclusive. The letters coming under this group are long ई, ऊ, ए and ओ; also short उ and long आ in one particular case.

s 80. ईदूदेद्द्विवचनं प्रगृह्यम् (1-1-11) S. K. 100 ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् ॥

A word in the dual number whether a verb or noun, when it ends in long ई, ऊ, or ए is called a pragṛhya.

हरी एतौ ॥ विष्णू इमौ ॥ गङ्गे अमू ॥ पचेते इमौ ॥

ऽ 81. अदसो मात् (1-1-12) S. K. 101. अस्मात् परौ ईदूतौ प्रगृह्यौ स्तः ॥

In the case of the pronoun अदस्, such of its forms that end in long ई or long ऊ, if immediately preceded by the letter म, are pragṛhyas. Here, the limitation that the form should be a dual does not apply.

e. g. अमी + अश्वाः
also अमू + आसाते

ऽ 82. ईदूतौ च सप्तम्यर्थे (1-1-19) S. K. 109 सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात् ।

Words ending in long ई and long ऊ, when they express the meaning of the seventh case, as in the Vedas, are also Pragṛhyas. e. g. मामकी तनू इति । Here तनू and इति do not combine as the meaning of 'मामकी तनू' is मामक्यां तन्वाम् and therefore a 'pragṛhya'. Similarly सोमो गौरी अधिश्रितः (Ṛg veda 9-12-3). Here गौरी means गौर्याम् ।

ऽ 83. उञः (1-1-17) S. K. 106 उञ इतौ वा प्रागुक्तम् ।

The particle (Nipāta) short उ is a pragṛhya when followed by इति according to the opinion of Sākalya, that is optionally.

e. g. उ + इति = उ इति or विति ।

ऽऽ 84. ऊँ (1-1-18) S. K. 107 उञ इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात् ।

According to the opinion of the same sage, the above particle उ may be displaced by a nasalised long ऊँ; such a case is also a Pragṛhya by this rule.

ऽऽ 85. निपात एकाजनाङ् (1-1-14) S. K. 103 एकोऽज्निपात आङ्वर्जः प्रगृह्यः स्यात् । इ विस्मये । इ इन्द्रः । उ वितर्के । उ उमेशः ।

In the class of Nipātas, those consisting of one vowel except the Nipāta आङ् are Pragṛhyas.

e. g. आ एवं नु मन्यसे. When it is a ङित्, आ is not a Pragṛhya. Thus आ + उष्णम् = ओष्णम् । The test by which we discover whether आ has ङ

as 'it' or not, is contained in the statement:

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित्।

When आ is used in the sense of 'a little' or is connected with a verb, or denotes 'a limit' it is a ङित्. But when it is an important part of a sentence or indicates recollection it is not a ङित्।

Note:— 'Nipātas' are determined by the following sūtra **प्राग्रीश्वरान्निपाताः (1-4-56).** This means that Nipatas are contained within the portion begining from this sūtra (1-4-56) to 'रीश्वर' in the Sūtra 'अधिरीश्वरे' (1-4-97).

Where a Nipāta, ends in ओ the ओ is a Pragṛhya by the rule:—

SS 86. ओत् (1-1-15) S. K. 104. ओदन्तो निपातः प्रगृह्यः स्यात्।

e. g. अहो ईशाः।

The final ओ of a Vocative singular when followed by "इति" is a Pragṛhya, optionally in secular language by the rule:—

SS 87. संबुद्धौ शाकल्यस्येतावनार्षे (1-1-16) S. K. 105 संबुद्धिनिमित्तक ओकारो वा प्रगृह्यः अवैदिके इतौ परे।

To summarise, the following is the result:—

(i) *Short* उ is a Pragṛhya in secular language when followed by 'इति' optionally.

(ii) *Long* ऊँ. The above short उ may optionally be displaced by a nasalised long ऊँ in which case also, it is Pragṛhya.

(iii) Nipātas of one syllable are Pragṛhyas except आ when it is a ङित्.

(iv) *Long* ई and *long* ऊ are Pragṛhyas when they end in dual, whether of nouns or of verbs.

(v) When words ending in long ई or long ऊ convey the meaning of the seventh case, they are Pragṛhyas. (This is found only in the Vedas.)

(vi) ओ is also a Pragṛhya optionally when it ends the Vocative singular and is followed by इति।

हल्सन्धिः (Consonantal Combination)

There is a considerable variety of changes that consonants undergo in combination. The necessity for these changes is obviously the unconcious need for ease in pronunciation. This is secured (i) by the change of one consonant into another (ii) by hardening (iii) by softening (iv) by nasalising etc. etc. It is difficult however to make these changes come under some definite general rules based on phonetic necessity ; for every such rule that could be framed will have to be restricted by such a large number of exceptions, that not much of the general rule will survive. However, it is not impossible to guess at some general principals, under which groups of changes may be placed to facilitate easy remembrance. For arriving even at such a modest result, a recapitulation of the topic 'Organs of utterance' in pp. 16 to 20 may be of some help :—

Among the seven groups, mentioned therein, the tongue takes part in three—(1) ऋटुरषाणां मूर्धा (the Cerebrals), (2) इचुयशानां तालु (the Palatals) and लृतुलसानां दन्ताः (the Dentals). In spite of many small exceptions, we find that dentals change into Palatals or Cerebrals, but not the reverse. The reason possibly is that it is easier for the raised tongue to proceed backward and touch the Palate and the Cerebrum, than to proceed forward to the teeth from either of these. So, it is the dental that changes to the cerebral or palatal and not the reverse. Labials and Gutturals do not change as they are pronounced by distinct organs and have nothing in common (i. e.) no common instrument of speech, like the tongue.

Another table appended below will be of help in remembering these rules. As the present context refers to हल् सन्धि, the Vowels pronounced by the same organs as the consonants, are omitted.

ह	क	ख	ग	घ	ङ	
श	च	छ	ज	झ	ञ	Shortly called चु
ष	ट	ठ	ड	ढ	ण	,, ,, टु
स	त	थ	द	ध	न	,, ,, तु
	प	फ	ब	भ	म	

A comprehensive view of the more important (i. e. the general) rules of the हल्सन्धि shows that the changes that take place may be grouped under the following heads :—

श्रीशिवपादकमलरेणुसहस्रे

॥ दयापद्धतिः ॥

तरुणेन्दुचूडचरणाणुकस्तुतौ
सदसे रसैकपदसेविनां कृतिः ।
अनुटीकयैव न नटी कया भवे-
त्प्रतिमल्लवादिकविमल्लझल्लरी ॥ १ ॥

विगाह्य मुनिमानसान्यनुकलं पुरद्वेषिणः
पदाम्बुजरजः परां दिशसि सर्वतो निर्वृतिम् ।
भवन्तमपहाय कः स्पृशति वत्सलत्वं भुवि
प्रपन्नजनपालनप्रणयिनां स एष क्रमः ॥

पुरां जेतुर्मातः पदकमलयोः पांसुकणिके
करस्थं कैवल्यं त्वयि कृतदयायामिव मम ।
अनेन त्वं लघ्वी किमसि मयि दीने ननु कथं
शशिज्योत्स्ना कृत्स्नं जनयति जगद्रञ्जनविधिम् ॥

चरणमुपगतानां शूलिनः पादपांसो
शमयसि दुरितार्तिं नित्यमव्याजतस्त्वम् ।
अखिलनिगमपुष्यत्कल्पवल्लीप्रसूनै-
रभिनवशरदिन्दुश्रीकरैस्स्वैर्मयूखैः ॥ ४ ॥

शरणमुपगतानां शूलिनः पादरेणो
निरवधिभवतापं नित्यमन्तर्निगीर्य ।
तदुपशमनमत्या नूनमाप्लाव्यसे त्वं
नखशशिगलिताभिश्शीतलाभिस्सुधाभिः ॥

*   *   *

वामेन पादकमलेन विदारितस्य
कामारिणा भगवता खलु दण्डपाणेः ।
सक्ताश्चिराय निटिले चरणाब्जरेणो
भूयो भवान तदवने प्रतिभूत्वमेति ॥ ७ ॥

उद्दिश्य पादयुगलीमुडुनाथमौळेः
पुंसः परस्य पदयोः प्रपतन्ति देवाः ।
तद्रक्षणव्यसनिता तु तवैव कोऽय-
मव्याजपालनरसाशिवपादरेणो ॥ ८ ॥

नखशशिसमुदीर्णा नीलकण्ठस्य नित्यं
श्रुतिकुवलयलक्ष्मीं स्वैरमुल्लासयन्ती ।
मुनिहृदयचकोरानन्दसम्पातशीला
शिवचरणजरेणुश्चन्द्रिकारीतिमेति ॥ ९ ॥

हृद्व्योमसीम्नि यमिनामुदयं व्रजन्ती
स्वीयैर्मयूखविसरैर्महिता तटिद्भिः ।
कारुण्यपूरशिशिरा शिवपादरेणो
कादम्बिनीव भवतापमपाकरोषि ॥ १० ॥

मान्या त्वमेव मदनान्तकपादरेणो
मातेव मादृशजनस्य कृपापदस्य ।
आगःकृतौ सहनमप्यवनं परेभ्य-
स्त्वय्यासते सरळता च दयाळुता च ॥११॥

कल्पयसि सौख्यमखिलं
कामान्निहन्तुः पदाब्जरेणो त्वम् ।
अव्याजमेव यमिना-
मुत्पललोकस्य चन्द्रलेखेव ॥ १२ ॥

मातर्महेश्वरपदाम्बुजपांसुरेखे
मत्तः क ते कथयतां करुणैकपात्रम् ।
त्वं चापि किंच दयिते पदयोः पुरारे-
रव्याजपालनकलारसिका जनानाम् ॥ १३ ॥

तापत्रयं मम चिराय भवादुदीतं
ताराधिनाथमकुटस्य पदाब्जरेणो ।
चौर्यक्रमादिव भवानपहर्तुकामः
प्राप्तोऽस्यणुत्वमखिलश्रुतिलालनीयम् ॥ १४ ॥

पदसरसिजरेणो पार्वतीप्राणनेतु-
र्व्यपगतसुकृतानां विश्रुतानाञ्जनानाम् ।
परिहरसि भवाग्निं प्रार्थिता जात्वपि त्वं
सहजशिशिरमूर्तिश्चन्द्रिकाभिर्नखेन्दोः ॥

पादपद्मजरजः पुरजेतुः
प्रोत्थितं नखसुधाकरसीम्नः ।
शीतळानि कुरुषे नमतां त्वं
चन्द्रिकेव ललिता नयनानि ॥ १६ ॥

पापापहारिणि पदाम्बुजपांसुरेखे
प्राणादपि प्रियतमा यमिनामपि त्वम् ।
अभ्युन्मुखेषु निजजीवितकेषु सद्यो
हस्तावलम्बनविधिं विदधासि तेषाम् ॥

पदसरसिजरेणो प्राक्तनानां श्रितानां
दळयसि परितापं दीर्घसंसारजन्यम् ।
नखशशिनि समुत्थैर्नूत्नकान्तिप्रवाहै-
स्समुदितकरुणार्द्रैश्शीतळैश्शीकरौघैः ॥ १८ ॥

कर्तुं प्रहर्षमधिकं गिरिकन्यकाया
जेतुः पुरां दमयितुः प्रकृते नियुद्धे ।
प्राप्ता निटालसरणिं पदपद्मरेणो
त्वं कल्पसेऽथ विजयं जयवन्तमाजौ ॥

सकृत्प्रणामेन शिवाङ्घ्रिरेणो
गच्छन्प्रदोषे मकुटोपकण्ठम् ।
सुधा विधत्से मदतः प्रसक्ता-
नमर्त्यमौळेरखिलांश्च दोषान् ॥ २० ॥

अनन्यसाधारणभक्तिभाजा-
महर्निशं शङ्करपादरेणो ।
रजोगुणानामुदयं निरुन्ध-
न्रजस्त्वमार्यापतिपादरेणो ॥ २१ ॥

दूरस्थितान्हृदयबालमृगान्मुनीना-
मत्यर्थतापविवशानमृतं पिपासून् ।
आकृष्य पादजपराग मरीचयस्ते
विश्रामयन्त्यहह विश्वगुरोः पदाब्धौ ॥

पदकिसलयरेणो पार्वतीप्राणनेतु-
श्शिशिरय सहसास्मान्शीतलैस्त्वन्मयूखैः ।
जठरजलधिचक्रस्त्क्षुत्पिपासादिदम्भै-
रविरळबडवाग्नेरङ्कुरैर्लीढगात्रान् ॥ २३ ॥

पायात्पुरान्तकपदाम्बुजपांसुरेखा
पापान्धकारदळनोत्थितचन्द्रलेखा ।
स्वर्गौकसां मकुटसीम्नि सुवर्णरेखा
मौनिच्छटाहृदयचातकमेघरेखा ॥ २४ ॥

इति श्रीशिवपदकमलरेणुसहस्रे शिवलीलार्णवनाम्नि दयापद्धतिस्समाप्ता ॥

शिवपादकमलरेणुमहस्से

॥ लक्ष्मीपद्धतिः ॥

* * *

भाग्येन्दिरासि भवती भवपादरेणो
त्वामेव देवि भजतां सततं जनानाम् ।
तस्मादहर्निशमपि स्मरशासनस्य
पुष्णासि पादकमलस्थितिमादरेण ॥ २ ॥

संचारशालिनि भवाङ्घ्रिजपांसुजाले
सीमन्तसीम्नि सुरपुङ्गवसुन्दरीणाम् ।
तत्सङ्गतिं करगतामविहातुकामा
लक्ष्मीः स्थिरा भगवती सुरराजधान्याम ॥

यस्त्वां शिवस्य पदपङ्कजपांसुरेखे
संसेवते मनसि सम्पदमाप्तुकामः ।
सोऽयं क्रमेण सततप्रणयी शचीनां
काश्मीरपत्रमकरीः कुरुते कुचेषु ॥ ४ ॥

अर्चन्ति ये हरपदाम्बुजपांसुरेखे
त्वामम्ब मानसमयैस्तरुणप्रसूनैः ।
सद्यः पदं सुरभयन्ति सुरास्तदीयं
माल्यैर्मदान्धमधुपारवपारतन्त्र्यैः ॥ ५ ॥

मूर्तिर्भवान्माधवकोपनायाः
पादाब्जरेणो पुरशासनस्य ।
न चेत्कथं ते नदराजमध्ये
पादाम्बुजाख्ये परमं विहारः ॥ ६ ॥

सन्ध्याप्रणामसमयेषु शशाङ्कमौलेः
फालस्थलीषु पतितं पदरेणुजालम् ।
मूर्ताः किलानुकलयन्ति मुदा समग्रा
माङ्गल्यसम्पद इव प्रमदास्सुराणाम् ॥

अङ्घ्रिस्थितैः पशुपतेररुणाणुभेदै-
स्सम्पूर्य कौस्तुभकरण्डपुटीं समग्राम् ।
वक्षःकवाटसविधे वसतिं भजन्त्या
दक्षः श्रियो भवति दानवदर्पहन्ता ॥ ८ ॥

शम्भोः पदाम्बुजरजस्सुरभिप्रतोळी-
केळीमिळन्मधुकरीमयशृङ्खलाभिः ।
बद्धा सती भगवती वसति स्वयं श्री-
रद्यापि नूनमलकाभिधराजधान्याम ॥ ९ ॥

शम्भोश्चराचरगुरोश्चरणाब्जधूळीं
मूर्ध्नी प्रगृह्य मुहुरत्र नमस्क्रियासु ।
निक्षिप्य नीरजभवो नियतं प्रसूते
पुण्याक्षराणि पुरुहूतमुखाक्षमायाम् ॥ १० ॥

धृत्वा शनैर्द्रुहिणमौळिभिदः पदाणू-
न्तारात्मना परिणतैरथ तैः परागैः ।
विन्दन्ति केऽपि विविधा अपि किम्पचाना
राज्येन्दिराप्रथमदिग्रजनीशभावम् ॥ ११ ॥

मन्थानतो विगळितान्मखभित्पदाणू-
न्हस्तारविन्दरजसामणुकैतवेन ।
केनापि भाग्यपरिपाकवशेन लब्ध्वा
क्षीराम्बुराशितनया श्रियमश्नुते स्म ॥१२॥

पशुपतिपदरेणो भूयसस्ते महिम्नः
  कथय भुवि कर्ण वा कः पुनः स्तोतुमीशः ।
मदवदसुरपङ्क्तेर्मन्दरोद्धारकर्म-
  ण्यजनि यदपराधादाकुला राज्यलक्ष्मीः ॥
उद्याननर्मविहृतावुपकण्ठसक्त-
  मङ्घ्रीयरेणुकणमर्चयतो धनेशात् ।
श्रीरङ्गमूर्तिमनिशं श्रितवान्श्रिया किं
  भूयानसौ भुवि निशाचरचक्रवर्ती ॥ १४ ॥
दृष्ट्वा प्रदोषनटनं द्रुहिणद्रुहो ये
  स्वर्गौकसस्सकुतुकं स्वपुरीं प्रयाताः ।
तेषां तदीयपदपङ्कजपांसुखण्डा
  माङ्गल्यलाजानिकरा मकुटस्थलीषु ॥ १५ ॥
चरणकमलरेणूंश्चन्द्रमौळेरमर्त्याः
  शिरसि विनिदधानाश्चिन्तयन्तश्च नित्यम् ।
अभुजबलविकृष्टामन्तरिक्षावलम्बां
  भुवमिव रमणीयां भुञ्जते राज्यलक्ष्मीम् ॥
रेणो पदाब्जजनिते रजनीशमौळे-
  रभ्यर्णविभ्रमवतीमलकां भजत्या ।
मान्येषु सत्सु बहुशो मखभोजनेषु
  प्रायस्स एव धनदो धनदो भवत्या ॥१७॥
नाथस्य शैलधनुषो नियतैर्विहारैः
  पादाब्जरेणुकणिके प्रणयप्रसक्ता ।
वीरस्य दानवपतेर्विषमोपसर्गा-
  त्पुष्णासि गाढमलकामधिदेवतेव ॥ १८ ॥
प्रौढप्रदोषनटनावसरे पुरारे-
  रुच्चावचं प्रचलितेषु पदाणुकेषु ।
तत्सङ्गसौरभवतीमखिलामपि द्यां
  कैलासमेव चतुराः कलयन्ति केऽपि ॥१९॥
रामाश्रिता चिरमशोकमहीशयाना
  विश्वप्रसूर्वसुमती श्रुविजातवर्ण्या ।
पृथ्वीभवा पुरनिषूदनपादरेणु-
  स्सीतेव शुद्धचरिता शुभदा ममास्तु ॥
नानाकृतावनुकृता नियमेन नेतु-
  र्वेळासु कास्वपि च विष्णुपदं स्पृशन्ती ।
आळिर्शिवाङ्घ्रिरजसामसतीविदूरा
  दूरीकरोतु दुरितं धरणीसुतेव ॥ २१ ॥
    शिवाङ्घ्रिजरजोरेखा
      धुनाना लवकण्टकान् ।
    विजयप्रतिभूर्नित्यं
      विमला कमलेव सा ॥ २२ ॥
विहृतिषु विधुमौळेः पातितान्पादरेणू-
  न्मकुटरपि परभक्त्या शेखरे ये भजन्ते ।
तदुपरि निपतन्ति द्राक्सुधासिन्धुवीची-
  विहृतिविहितगन्धासिन्धुजादृष्टिबन्धाः ॥
साक्षाच्छम्भोः पदकमलयोस्सौरभङ्गैः परागै-
स्सम्बद्धानामपि मखभुजां सम्पदो नो विचित्राः ।
यत्साम्निध्यप्रणयिमनसो यक्षकन्याविजेतुः
पादाक्रान्ताप्यभजत चिरं पादुका राज्यलक्ष्मीम् ॥
पराशिवपदपद्मादुत्थितैः पांसुजालैः
  करनियमितभाग्याः केपि कैवल्ययोग्याः ।
तृणमिव कथयन्ते डिण्डिमोद्घोषपूर्वं
  परिमितगुणवादान्पार्थिवाणुप्रभेदान् ॥२५॥

इति श्रीशिवपदकमलरेणुसहस्रे शिवलीलार्णवनाम्नि लक्ष्मीपद्धतिस्समाप्ता ॥

श्रीशिवपादकमलरेणुसहस्रे

॥ अथ शैशवपद्धतिः ॥

*   *   *

आम्नायार्थस्नुतमधुझरीमाधुरीमुद्वमन्तः
खेलन्तः स्वैः पदकमलयोरेधमानैः परागैः ।
लाक्षारागैः पुनरपि तयोः पाङ्कुलाङ्काः परागाः
काञ्चित्क्रीडां पुरदमयितुः कुर्वते सर्वदापि ॥

नखशीतलभानुबिम्बपङ्क्ति
रमयन्त्यां मुनिमानसोत्पलिन्याम् ।
अभवन्किमशेषलोकभर्तु-
श्शिशवः केचन पादपांसुदम्भात ॥ ३ ॥

श्रीकण्ठपादजरजाश्शिशुतां प्रपन्ने
केनापि भाग्यपरिपाकवशादवार्यम् ।
पादाम्बुजे प्रणयिनि श्रुतिसुन्दरीणां
लीलाविनोदनविधिं रहसि शृणोषि ॥ ४ ॥

पादोपकण्ठे परमस्य शम्भो-
स्त्वय्या जनन्या शिशुतां प्रपन्ना ।
त्वं वर्धसे पादपयोजरेणो
नखांशुजालैर्नवदुग्धपूरैः ॥ ५ ॥

चरणकमलरेणो चन्द्रलेखाललाम-
स्तव किमु कथनीयस्तादृशः पुण्यसारः ।
उपचिततपसां यन्मौनभाजां विदूरं
चरणकिसलयं त्वत्पांसुलीलैकसाक्षी ॥ ६ ॥

सर्वोऽपि तुष्यतु जनो जगतीतलेऽस्मि-
न्वात्सल्यसौरभमुचा वचसा जनन्याः ।
भक्तस्य देवि मम चेद्वृषपादरेणो
मात्रा त्वयैव चिरशैशवभागधेयम् ॥ ७ ॥

नखरद्विजराजशिक्षितानां
परशम्भोः पदपार्थिवाणुकानाम् ।
प्रभवन्ति पदप्रभाप्रवाहा
ह्यभिषेकोत्सवमान्हिकं च कर्तुम ॥ ८ ॥

उत्प्रेक्षयामः पदरेणुसङ्घा-
नुद्भासितानुत्पलबन्धुमौळेः ।
पादाम्बुजाख्ये सदने प्रसूतान्
श्रुत्यङ्गनानां सुकुमारवर्गान् ॥ ९ ॥

अङ्के चरन्नगभुवो हरिणाङ्कमौळेः
पादारविन्दजपराग रहोविलासे ।
स्वैरं दुरापमिभवक्त्रषडाननाद्यै-
रिम्भे भवान्समधिगम्य शिशुत्वभावम् ॥

अनाघ्राय स्तन्यं कुहचिदपि दुग्धं किमपि य-
मनारूढो डोलामनवगतगन्धो जनिषु च ।
पदाम्भोजीयाणो पुरदमयितुः केन सुलभं
शिशुत्वं स्वीकर्तुं त्रिपुरहरशुद्धान्तसुदृशाम् ॥

श्रुतिश्रेणीपाणिस्फुरणनियतप्रेङ्खितगुणां
नखच्छायाडोलां सुखमनुभवन्स्वादिमवतीम् ।
वमन्माध्वीधारां पदकमलपीतां पशुपते-
शिशुस्त्वं पादाणो शिव शिव न जाने क्व जगति ॥

नमन्नाकस्त्रीणां नमनरुचिपूरैर्विमलयन्
शरीरं स्वर्गङ्गासलिलकणसौहार्दरसिकैः ।
नखश्रीमञ्जूषानिलयमनुकुर्वंश्चरणयोः
रजोदम्भो डिम्भो रतिरमणजेतुर्विजयते ॥

शम्भोश्चराचरगुरो-
श्चित्रं चरितं पदाब्जरजसस्ते ।
कान्त्या शिशुरपि भानो-
श्छायां निर्मासि सेवकजनानाम् ॥ १४ ॥

नखश्रीसन्दोहं झडिति नवनीतं कबळय-
न्नुदस्तोत्कण्ठाभिः श्रुतिभिरुपकण्ठं च घटितः ।
स्वमात्मानं तत्तादृशमपि च ताभ्यः प्रकटय-
न्पदीयाणुच्छद्मा पशुपतिकुमारो विजयते ॥

पादारविन्दजपराग परस्य धाम्न-
स्सन्न्यस्तकामुककलां शिशुतां प्रपन्नः ।
सोऽयं भवान तदपि हन्त चिरानुरागा-
त्स्वय्येव सङ्गतदृशस्सुदृशो रमन्ते ॥ १६ ॥

उत्कण्ठिते स्मरहरेऽप्युपयाति तूर्णं
रन्तुं च दारुवनिकारमणीसमूहैः ।
तासां तदैव स भवान् शिशुभावमुग्धः
कामानि पूरयितुमेव कथं प्रगल्भः ॥ १७ ॥

लब्ध्वा पुरैव शशिचूडपदाब्जरेणो
वेगात्तपस्विसुदृशां विहृतिं कुचेषु ।
सङ्गावधौ भगवतश्शिशुरप्यकस्मा-
द्वक्षोजकुङ्कुममिषात्क्व नु गुप्तिमेषि ॥

पादारविन्दजपराग परस्य शम्भोः
पाकं भवन्तमनिशं प्रणयात्प्रतीमः ।
यस्माच्चिराय भवते स्वदतेऽनुवेलं
श्रुत्यङ्गनाचिकुरकुङ्कुमधूलिकेळिः ॥ १९ ॥

तमोगजजयानीतनखमुक्ताफलव्रजः ।
शेते चरणपर्यन्ते शिवाङ्घ्र्यणुककेसरी ॥
शिवाङ्घ्रिजरजोरेखा रेखापद्मे पदस्थिते ।
हेमगर्भार्भकश्रेणिहेवाकभरमश्नुते ॥ २१ ॥

इति श्रीशिवपदकमलरेणुसहस्रे शिवलीलार्णवनाम्नि

शैशवपद्धतिस्समाप्ता ॥

2 3 4 12
महादेव! महादेव! महादेवेति कीर्तयेत् ।
5 6 7 1
उमायाः पतये चैव हिरण्यपतये सदा ॥
8 9 10 11
हिरण्यबाहवे तुभ्यं वृषांकाय नमो नमः ॥ ५ ॥

மஹாதேவ ! மஹாதேவ ! மஹாதேவேதி கீர்த்தயேத்
உமாயா: பதயே சைவ ஹிரண்யபதயே ஸதா
ஹிரண்யபாஹவே துப்யம் விருஷாங்காய நமோ நம:

[ப-ரை] (1) எப்பொழுதும் (2-3-4) மஹாதேவா ! மஹாதேவா ! மஹாதேவா ! என்றும், (5-6) உமாபதயே நம: என்றும் (7) ஹிரண்யபதயே நம: என்றும் (8-9) ஹிரண்யபாஹவான உமக்கு வணக்கம் என்றும் (10-11) எருதுக் கொடியுடையானுக்கு வணக்கமென்றும் (12) சொல்லுவார்களோ.

1 2 3 4 5 6 12 13
नृसिंह! वामनाचिन्त्य! माधवेति च ये जनाः ।
17 15 16 7 8 9
वक्ष्यन्ति सततं हृष्टाः ब्राह्मणाः क्षत्रियास्तथा ॥ ६ ॥
10 11 12 14
वैश्याः शूद्राश्च ये नित्यं;

ந்ருஸிம்ஹ ! வாமநாசிந்த்ய ! மாதவேதி ச யே ஜநா:
வக்ஷ்யந்தி ஸததம் ஹ்ருஷ்டா: ப்ராம்ஹணா: க்ஷத்ரியாஸ்ததா
வைச்யாச்சூத்ராச்ச யே நித்யம்;

[ப-ரை] (1) ந்ருஸிம்ஹா ! (2) வாமனா ! (3) நினைக்கறியக்கூடாதவனே ! (4) மாதவா ! (5-6) என்றும் (7-8-9-10-11) பிராமண க்ஷத்ரிய வைச்ய சூத்ரர்களும் மற்றவர்களுமாகிய (12-13) எந்த ஜனங்கள் (14) தினந்தோறும் (15) எப்பொழுதும், (16) ஸந்தோஷமடைந்தவர்களாய் (17) சொல்லுவார்களோ;

1 2
तेषां धनगृहादिषु ।
3 4 5 7 8 6
आरामे चैव गोष्ठेषु न विशेषाः कथञ्चन ॥ ७ ॥

தேஷாம் தநக்ருஹாதிஷு ।
ஆராமே சைவ கோஷ்டேஷு ந விசேஷா: கதஞ்சந ॥

[ப-ரை] (1) அவர்களுடைய (2) செல்வம் வீடு முதலியவற்றிலும், (3-4) பூங்காவனங்களிலும், (5) மாட்டுத்தொழுவங்களிலும், (6) எக்காரணத்தாலும் (7-8) பிரவேசிக்கக்கூடாது.

ज्वालामालाकरालञ्च सहस्रादित्यसन्निभम् ।
चक्रं विष्णोरतीवोग्रं तेषां हन्ति सदाऽशुभम् ॥ ८ ॥

ஜ்வாலாமாலாகாாலஞ்ச ஸஹஸ்ராதித்யஸந்நிபம் ।
சக்ரம் விஷ்ணோரதீவோக்ரம் தேஷாம் ஹந்தி ஸதாऽசுபம் ॥

[ப-ரை] (1) அக்கி ஜ்வாலைகளால் சூழப்பட்டு பயங்கரமாயுள்ளதும் (2) ஆயிரம் கோடி சூரியர்களுக்கொப்பானதும் (3-4) மிகவும் உக்ரமானதுமாகிய (5) திருமாலின் (6) சக்கரம் (7) அவர்களுடைய (8) அசுபத்தை (9) எப்பொழுதும் (10) நாசம் செய்கின்றது.

स्वाहाकारो वषट्कारो गृहे यस्मिन् हि वर्तते ।
तद्हित्वा चान्यमागच्छ सामघोषोऽथ यत्र वा ॥ ९ ॥

ஸ்வாஹாகாரோ வஷட்காரோ க்ருஹே யஸ்மிந் ஹி வர்த்ததே ।
தத் ஹித்வா சாந்யமாகச்ச ஸாமகோஷோऽத யத்ர வா ॥

[ப-ரை] (1-2) எந்த (3) வீட்டில் (4) *ஸ்வாஹாகாரமும் (5) வஷட்காரமும் (6) இருக்கிறதோ, (7-8) அல்லது (9) எங்கு (10) ஸாமவேதகோஷம் (இருக்கிறதோ) (11) அதை (12) விட்டு (13) வேறு இடத்தை நோக்கி (14) செல்லுவீராக.

वेदाभ्यासरता नित्यं नित्यकर्मपरायणाः ।
वासुदेवार्चनरता दूरतस्तान्विसर्जयेत् ॥ १० ॥

வேதாப்யாஸாதா நித்யம் நித்யகர்மபராயணா: ।
வாஸுதேவார்ச்சநரதா தூரதஸ்தாந் விஸர்ஜயேத் ॥

---

* ஸ்வாஹா-வஷட்-என்னும் சொற்கள், தேவர்களை உத்தேசித்துச் செய்யப்படும் ஹோமங்களில் உபயோகிக்கப்படும் மந்திரங்கள்.

[ப-ரை] (1) (எந்த இடத்தில்) எக்காலமும் (2) வேதமோதுவதையே முக்கியமாகக் கொண்டவர்களும், (3) நித்யகர்மங்களைச் சிரத்தையுடன் செய்து வருபவர்களும், (4) ஸ்ரீவாஸுதேவனைப்பூஜிப்பதிலேயே ஊன்றிய கருத்துள்ளவர்களும் (இருக்கிறார்களோ) (5) அந்த இடங்களை (6) தூரத்திலேயே (7) விட்டுவிடவேண்டும்.

3 2 1 7 4 5 6
अग्निहोत्रं गृहे येषां लिङ्गार्चा वा गृहेषु च ।
9 8 11 10 12
वासुदेवतनुर्वाऽपि चण्डिका यत्र तिष्ठति ॥ ११ ॥
16 17 14 15 13
दूरतो व्रज तान् हित्वा सर्वपापविवर्जितान् ॥

அக்னிஹோத்ரம் க்ருஹே யேஷாம் லிங்கார்ச்சா வா க்ருஹேஷு ச ।
வாஸுதேவதனுர்வாபி சண்டிகா யத்ர திஷ்டதி ॥
தூரதோ வ்ரஜ தாந் ஹித்வா ஸர்வபாபவிவர்ஜிதாந் ॥

[ப-ரை] (1) எவர்களுடைய, (2) வீட்டில், (3) அக்னிஹோத்ரம் (நடக்கிறதோ), (4) (அல்லது), (5-6) (யாருடைய) வீடுகளில், (7) சிவலிங்க பூஜை நடக்கிறதோ, (8) அல்லது, (9) ஸ்ரீ வாஸுதேவனுடைய திருமேனி (விக்ரஹம்) இருக்கிறதோ, (10) எங்கு, (11) சண்டிகாதேவி, (12) இருக்கிறாளோ, (13) எல்லாவிதமான பாபங்களாலும் விடப்பட்ட, (14) அவர்களை, (15) விட்டு (விலகி), (16) தூரத்தில், (17) செல்வீராக.

2 3 5 4
नित्यनैमित्तिकैर्यज्ञैर्यजन्ति च महेश्वरम् ।
6 7 12 8 1 9 11 10
तान् हित्वा व्रज चान्यत्र दुस्सह! त्वं सहानया ॥ १२ ॥

நித்யநைமித்திகைர்யஜ்ஞைர்யஜந்தி ச மஹேச்வரம் ।
தாந் ஹித்வா வ்ரஜ சாந்யத்ர துஸ்ஸஹ! த்வம் ஸஹாநயா ॥

[ப-ரை] (1) துஸ்ஸஹமுனிவரே! (2) *நித்யமாகவும் நைமித்திகமாகவுமிருக்கிற (3) யாகங்களினால் (4) (எவர்கள்) இறைவனை, (5) வழிபடுகின்றனரோ.

* நித்யம்–தினந்தோறும் செய்ய வேண்டியவை: ஸ்நானம், ஸந்தியாவந்தனம் போன்றவை. நைமித்திகம்=எப்பொழுதாவது ஒரு தரம் நிகழும் சம்பவங்களில் செய்ய வேண்டியவை. கிரஹணஸ்நானம், தர்ப்பணம் போன்றவை.

(6) அவர்களை (7) விட்டு (8) வேறு இடத்திற்கு (9) நீர் (10-11) இவனுடன் (12) சென்றுவிடவேண்டும்.

1 2 3 4 5 9
श्रोत्रिया ब्राह्मणा गावो गुरवोऽतिथयस्सदा ।
6 10 7 8 11 12
रुद्रभक्ताश्च पूज्यन्ते यैर्नित्यं तान् विवर्जयेत् ॥ १३ ॥

ச்ரோத்ரியா ப்ராஹ்மணா காவோ குரவோऽதிதயஸ்ஸதா ।
ருத்ரபக்தாச்ச பூஜ்யந்தே யைர்நித்யம் தாந் விவர்ஜயேத் ॥

[ப-ரை] (1) வேதங்களை நன்றாகக் கற்றுணர்ந்த (2) அந்தணர்களும், (3) பசுக்களும், (4) ஆசிரியர்களும், (5) அதிதிகளும், (6) சிவனடியார்களும் (7) எவர்களால் (8) தினந்தோறும் (9) எக்காலமும் (10) பூஜிக்கப் படுகின்றனரோ, (11) அவர்களை விட்டு (12) விலகிவிடவேண்டும்.

दुस्सह उवाचः—

2 4 5 3 6 7 1
यस्मिन्प्रवेशो योग्यो मे तद्ब्रूहि मुनिसत्तम ।
8 9 13 10 11 12
त्वद्वाक्याद्भयनिर्मुक्तो विशाम्येषां गृहे सदा ॥ १४ ॥

துஸ்ஸஹ உவாச:—

யஸ்மிந் ப்ரவேசோ யோக்யோ மே தத்ப்ருஹி முனிஸத்தம ।
த்வத்வாக்யாத் பயநிர்முக்தோ விசாம்யேஷாம் க்ருஹே ஸதா ॥

துஸ்ஸஹ முனிவர் சொன்னார்:—

[ப-ரை] (1) முனிவர்களுள் சிறந்தவரே! (2) எந்த இடத்தில் (3) எனக்கு (4) பிரவேசம், (5) தகுமோ (6-7) அதைச்சொல்வீராக. (8) உங்களுடைய வார்த்தையினால் (9) அச்சமில்லாதவனாய் (10) இவர்களுடைய (11) வீடுகளில் (12) எக்காலமும் (13) பிரவேசிக்கிறேன்.

मार्कण्डेय उवाचः—

7 2 3 4 5 6 8
न श्रोत्रिया द्विजा गावो गुरवोऽतिथयस्सदा ।
1 9 10 11 12 13
यत्र भर्ता च भार्या च परस्परविरोधिनी ॥
17 16 15 14 19 18
सभार्यस्त्वं गृहं तस्य विशेथा भयवर्जितः ॥ १५ ॥

तनातन —पराशर ॥

तन —शुक ॥

तान —व्यास ॥

तानातन —पाराशरि ॥

ताननतानन —सत्यवतीसुत ॥ भिक्षुः परिव्राट् कर्मन्दीत्यादीनि मुनिनामानि ।

तान —योगि । मौनि ॥

तन —मुनि । यति । ऋषि । व्रति । शमि । यमि ॥

तनाना —परिव्राट् ॥

तानान —कर्मन्दि । योगीन्द्र । मौनीन्द्र ॥

तानन —संयमि । मस्करि । तापस । निर्मम ॥

तनान —तपस्वि । महर्षि । मुनीन्द्र । यतीन्द्र । व्रतीन्द्र । मुनीश । यतीश । व्रतीश ॥

तनना —मुनिराट् । यतिराट् । व्रतिराट् ॥

तनन —नियमि ॥

ताननतान —पारिकांक्षि । वीतराग । निर्ममेन्द्र ॥

तनातन —तपोनिधि । तपोधन । निरञ्जन । अनञ्जन । समाहृत । यतव्रत । मुनीश्वर ॥

तानातन —वाचंयम । अन्तर्मुख । प्रत्यङ्मुख । शापायुध । योगीश्वर । वीतस्पृह ॥

तनातना —वरोरजस् ॥

तनतन —शमधन । मुनिवर । मुनिपति । यतिपति ॥

इति मुनिनामानि ॥

अथ जननामानि ॥

तान —लोक ॥

तन —जन ॥

तनना —जनता ॥

इति जननामानि ॥

अथ स्तूयमाननामानि ॥

तान — गीत । गेय । स्तुत्य । कीर्त्यं । वर्ण्यं । ईड्य । वन्द्य । श्लाघ्य । शस्य । स्मार्यं । चिन्त्य ॥

तन — स्तुत । नुत । स्तुत्य । स्मृत्य ॥

तानान — उद्गीत । संकीर्त्यं । स्तोत्रार्ह । सश्लाघ्य । उद्घुष्ट । स्तोतव्य । स्तुत्यर्ह । निध्यात । निध्येय । संस्मार्यं । संचिन्त्य । संभाव्य ॥

तानन — कीर्तित । श्लाघित । सन्नुत । ईडित । वर्णित । वन्दित ॥

तनान — स्तवार्ह । प्रशस्य । प्रशस्त । प्रकीर्त्यं । विचिन्त्य । विभाव्य ॥

तनन — विनुत । प्रणित । पनित । पणित ॥

तनातान — प्रशंसार्ह । अभिष्टुत्य ॥

तानतान — स्तूयमान । गीयमान । ईड्यमान । कीर्त्यमान । वर्ण्यमान । श्लाघ्यमान । वन्द्यमान । शस्यमान । घुष्यमाण । स्तोत्रपात्र । चिन्त्यमान । भाव्यमान । ध्यायमान । स्मर्यमाण ॥

तानातन — सङ्कीर्तित । संश्लाघित । नित्यस्तुत । क्लृप्तस्तव । उद्घोषित । सम्भावित । संचिन्तित ॥

तानतन — नित्यनुत । स्तुत्यवर । स्तुत्यतम । कीर्त्यतर ।

तनातन — पणायित । प्रणायित । प्रकीर्तित । अभिष्टुत । स्तवोचित । कृतस्तव । कृतस्मृति ॥

तनतन — स्तुतिपद । नुतिपद ॥

तानातनान — तोष्टूयमान । संस्तूयमान । उद्गीयमान । जेगीयमान । सङ्कीर्त्यमान । सङ्घुष्यमाण । उद्घुष्यमाण । जोघुष्यमाण । संस्मर्यमाण । संचिन्त्यमान । सम्भाव्यमान । सङ्कीर्तनार्ह । संपठ्यमान ॥

तनानतान — प्रकीर्त्यमान । प्रशस्यमान । अजस्रगीत ॥

तनतानतान — उपगीयमान । परिकीर्त्यमान ॥

तनातानतान — अभिष्टूयमान । समुद्गीयमान ॥

तनतननातन —स्तुतिविषयीकृत ॥

तनताननातन —स्तुतिगोचरीकृत ॥

तनताननातना —स्तुतिगोचरीभवत ॥

तानातानातान —श्लाघापात्रीभूत ॥

तानातानातन —श्लाघापात्रीकृत ॥

इति स्तूयमाननामानि ॥

अथ स्वकीयनामानि ॥

त —स्व ॥

तान —स्वीय । आत्म । सौव ॥

तन —निज ॥

तानान —आत्मीय ॥

तनान —स्वकीय ॥

इति स्वकीयनामानि ॥

अथ गुणनामानि ॥

तान —शील । वृत्त । कीर्ति ॥

तन —गुण ॥

तना —यशस् । प्रथा ॥

तानान —चारित्र । माहात्म्य । औदार्य । कौशल्य । सौभाग्य । सत्कीर्ति । सद्वृत्त ॥

तानन —वैभव । प्राभव । सद्गुण । गौरव ॥

तनान —चरित्र । प्रभाव । सुशील । विभाव । सुवृत्त । सुकीर्ति । महत्व । प्रशस्ति ॥

तनन —पटिम । चरित । त्रिभव । महिम । गरिम । प्रथिम ॥

तनातन —गुणोन्नति । यशोभर ॥

तानतन —कीर्तिभर ॥

तानतान —कीर्तिपूर । सच्चरित्र । कीर्तिबन्धु ॥

तनतान —अपदान । अनुभाव । सुचरित्र ॥

तानानतान —कीर्तिप्रभाव ॥

तनानतान —यशोविशेष ॥

इति गुणनामानि ॥

अथ वन्दारुनामानि ॥

तान —नम्र । सेवि । नन्तृ । स्तोतृ । धातृ । स्मर्तृ । भक्त । आर्त । दीन ॥

तन —श्रित ॥

तना —नमत् ॥

तानना —आनमत् । सन्नमत् । भक्तिमत् । भक्तिभाज् ॥

तानान —आनम्र । वन्दारु । संसेवि । आराधि । आराद्धृ ॥

तानन —आनत । सन्नत । आश्रित । संश्रित । सेवित । (स्तावक) ॥

तनान —विनम्र । प्रणम्र । विनन्तृ । प्रणन्तृ । प्रपन्न । उपासि ॥

तनना —विनमत् । प्रणमत् । नतिकृत् । स्तुतिकृत् ॥

तनन —प्रणत । विनत ॥

तनातान —नमस्कर्तृ । नमस्कारि । चिरानम्र । उपासीन ॥

तनाताना —नमस्कुर्वत् ॥

तानतान —सेवमान । वन्दमान ॥

तानातन —आसेवक । संसेवक । सेवापर । आसेवितृ । आराधक । सेवाहत । सेवोन्मुख । सेवोत्सुक ॥

तानतन —भक्तिनत । कल्पप्रनति ॥

तानातना —भक्त्यानमस् । सेवोन्मनस् ॥

तानतना —भक्तिनमत् । नित्यनमत् । सेवनकृत् । वन्दनकृत् ॥

तनातन —निषेवक । उपासक । निषेवितृ । उपासितृ । कृतानति ॥

॥ श्रीः ॥

द्वितीयोऽङ्कः ।

(प्रविश्य)

विदूषकः— अहो ! परीसंतोह्मि कामपरतंतस्स देवस्स वअस्सत्तणेण । इअं रुप्पिणी, इअं सत्ताजिई, इअं जंबवई, इअं मित्तविंदेत्ति णत्तंदिवं उम्मत्तोविअ पडिघरं [1]पडि(रिं)ब्भमइ । ण वरं तं अणुसरंतो आउळीकिदोह्मि । [2]किंदु देवीहिं [3]वि जिण्णवाणरोविअ णाडिओ मोदअदंसणप्पदारणेण, ण उण दिण्णो । दाणिं सहअसिद्धामरिसाए सच्चभामाए धूविअमअणग्गहस्स णाहस्स णारओवि झंझाणिलोविअ धूमकेदुणो पच्चुअ संधुक्खओ संवुत्तो । पारिआअकुसुमपसंगकुविदाए ताए अणुणअत्थं आअच्छइ अअं सो वअस्सो । मंवि अक्कारेदुंविअ इदो दिण्णदिट्ठी चिट्ठइ । पुरेत्त भोअराअकण्णाए अक्खजिए णाहमाहवे [4]गहग्गहण ग्गहेण कुज्जीकदुअ चरमंगणिहिदसिळाखंडिआभग्गभुग्गकसेरुओ किदो । ताए सआसादो कहं कहंवि जीवंतस्स मह विंछिअभआदो पळाअंतस्स आसीविसमुहपअणं एदं आसि । का गई ? होदु । कुज्जळीळं धारेमि ।
(इति तथा तिष्ठति)

[अहो ! परिश्रान्तोऽस्मि कामपरतन्त्रस्य देवस्य वयस्यत्वेन । 'इयं रुक्मिणी, इयं सात्राजिती, इयं जाम्बवती, इयं मित्रविन्दा' इति नक्तंदिवं उन्मत्त इव प्रतिगृहं परिभ्रमति । न परं तं अनुसरन् आकुलीकृतोऽस्मि; किन्तु, देवीभिरपि जीर्णवानर इव नर्तकः मोदकदर्शनप्रतारणेन; न पुनर्दत्तः । इदानीं सहजसिद्धामर्षया सत्यभामया धूपितमदनग्रहस्य नाथस्य नारदोऽपि झंझानिल इव धूमकेतोः प्रत्युत संधुक्षकः संवृत्तः । पारिजातकुसुमप्रसंगकुपितायास्तस्या अनुनयार्थं आगच्छति अयं स वयस्यः । मामपि आकारयितुमिव इतो दत्तदृष्टिस्तिष्ठति । पुरैव भोजराजकन्यया अक्षजिते नाथमाधवे ग्रहग्रहणग्रहेण कुब्जीकृत्य चरमाङ्गनिहितशिलाखण्डिकाभग्नभुग्नकशेरुकः कृतः । तस्याः सकाशात् कथं कथमपि जीवतो मम वृश्चिकभयात् पलायमानस्य आशीविषमुखपतनं एतदासीत् । का गतिः ? भवतु । कुब्जलीलां धारयामि ।]
(इति तथा तिष्ठति ।)

---

1. "पडिरंभमइणवरंतं" इति 'क' पाठः । 2. "किमु" इति 'क' पाठः । 3. "जिण्ण" इति 'क' पाठः । 4. गहग्गहणिग्गहेण । इति 'क' पाठः ।

(ततः प्रविशति माधवः)

माधवः— (आत्मगतं)

जायेत जिह्मभाव श्शमधनवर्गेषु जातु न कुतोऽपि ।
संप्रति तद्विपरीतं समजनि चित्रं सरोजभूसूनौ ॥ १ ॥

(स्मितं कृत्वा)

जटाजूटं शीर्षे स्फटिकजपमालां करतले
तनौ चाप्यैणेयीं त्वचमितरहस्ते च कलशम् ।
मुनित्वश्चान्वीक्ष्य क्षुभितमनसो हन्त सुधियो
भवन्त्यन्ये लोकाः कथमिव न मुह्येयुरधियः ॥ २ ॥

विदूषकः— देव ! पसीद पसीद । [देव ! प्रसीद प्रसीद ।]

माधवः— उत्तिष्ठतु भवान् ।

विदू— णेदं पणामो । किंदु, एदं अहण्णत्तणं ।

[नेदं प्रणामः । किन्तु एतत् अधन्यत्वम ।]

माध — किमिदं वातस्य विक्रिया ?

विदू— णखु णखु । [न खलु न खलु ।]

माध — कस्य पुनरन्यस्य ?

विदू— तुह एव्व । [तवैव]

माध— किमयमभिशापः ?

विदू— अहव मह दुट्ठदिट्ठस्स; जेण अहं तुह सहीकिदो ।

[अथवा मम दुष्टदिष्टस्य; येन अहं तव सखीकृतः ।]

माध — तर्हि ऋजूकरोमि ।

विदू — णाहं सहावकुज्जा [1]तिवक्का [नाहं स्वभावकुब्जा त्रिवक्रा]

माध — अलं परिहासेन । तथ्यमेव कथ्यताम् ।

विदू — सवेमि मह बंहणीए तुह वअस्सत्तणेणेत्ति ।

[शपामि मम ब्राह्मण्या तव वयस्यत्वेनेति]

माध — (सस्मितं) वयस्य! किमेवं वल्लभा ब्राह्मणी ?

विदू — जह [2]तुह रुप्पिणी, जण्णिमित्तं एवं किदो बंह्मणो ।

[यथा तव रुक्मिणी । यन्निमित्तं एवं कृतो ब्राह्मणः]

माध — द्यूतजिते मयि आवयोरभेदाभिमानसारस्येनेदमापतितम् ।

विदू — जइ एव्वं, राओइदमोदएहिंवि होदव्वम् ।

[यद्येवं, राजोचितमोदकैरपि भवितव्यम]

माध — तर्हि सत्यभामया दापयामि । झटिति साधयावः ॥

विदू — (सहस्ततालं) भो वअस्स ! मुणिदं मुणिदं । जं पारिआअपसंगतंडविअस्स कोवग्गहस्स अग्गदो मं बलिं[3] करिस्ससि ।

[भो वयस्य ! ज्ञातं ज्ञातं । यत् पारिजातप्रसङ्गताण्डवितस्य कोपग्रहस्य अग्रतो मां बलिं करिष्यसि ।]

माध — (स्मितं कृत्वा) सन्निहिते मयि सख्यौ कोपस्य को वाऽवकाशः ?

विदू — दिट्ठं खु रुप्पिणीसआसे तुह वअस्सत्तणम् । ता मोएहि मं ।

[दृष्टं खलु रुक्मिणीसकाशे तव वयस्यत्वम् । तत् मोचय माम्]

माध — विश्वसिहि विश्वसिहि ।

(इति हस्ते गृहीत्वा उद्यानप्रवेशं नाटयति ।)

---

1. दिवक्का 'क' पाठः 2. तुहतुह 'क' पाठः 3. बळीकरिस्ससि 'क' पाठः

विदू — (अग्रतोऽवलोक्य ससंभ्रमं वेपथुं नाटयित्वा) देव ! रक्ख रक्ख रक्खोसेणिआदो ।

[देव ! रक्ष रक्ष रक्षःसैनिकात्]

माध — (स्मितं कृत्वा) वयस्य ! मा भैषीः । अनासादितरविकिरणप्रचारा[1] निरन्तरमकरंदधारावाहिनी नन्वियमुपवनी । पश्य पश्य —

उत्प्लुत्योत्प्लुत्य यान्तस्त्वरितमुपवनप्रान्तमम्भोजबन्धुं
पश्यन्तोऽदृष्टपूर्वं प्रतिहतनयनज्योतिषस्सन्निवृत्ताः ।
वेगव्याहन्यमानास्तरुषु भयभरभ्रान्तनेत्रप्रचारा
भूयः पश्यन्ति मार्गं वनमृगशिशवस्तिर्यगावृत्तकण्ठाः[2] ॥ ३ ॥

(इतस्ततः परिक्रम्य) वयस्य ! कथितमेव सात्राजितीकरङ्कवाहिन्या मदनमञ्जर्या —

श्रुत्वा तस्मात्पिशुनवशिनः पारिजातप्रवृत्तिं
कोपारोपात्कुटिलहृदया कोपना पूर्वमेव ।
तन्वी सा मे तटिदिव [3]घने मालतीमाधवीभ्यां
तत्रालीभ्यामुपवनलतामण्डपे तिष्ठतीति ॥ ४ ॥

हन्त ! न तु पश्यामि ।

विदू — देव ! देविं इदोददो विचीअंतो देक्खिअ णिवेदइस्सम् [देव ! देवीं इतस्ततो विचिन्वन् दृष्ट्वा निवेदयिष्यामि ॥]

माध — मा मैवम् । वयस्य ! जानासि वै कुहनावन्यापारम् । उभावप्येनामन्वेषयाव ।

(इत्यन्वेषणमभिनयतः)

माध — इतो गता सात्राजिती । यतः —

उद्यानश्रीमुखोदग्रतिलकास्तिलकाः पथि ।
आलोकितास्तयाऽकाले पुष्णन्ति नवकोरकान् ॥ ५ ॥

---

1. प्रचारनिरंतर 'क' पाठः । 2. 'कूर्णाः' ख पाठः । 3. 'घटे' ख पाठः ।

विदू— णेदं पमाणं । जं अकालेवि कुसुमाइं [1]दीसंति ।

[नेदं प्रमाणं यत् अकालेऽपि कुसुमानि दृश्यन्ते ।]

माध— एवमेतत् । [2]पश्य, दृश्यते पदपङ्क्तिः ।

विदू— पुराअणी इअं पदपंतिआ । [पुरातनी इयं पदपङ्क्तिः]

माध— नहि नहि । अद्यतन्येव । तथाहि—

अरुणजलरुहाणामाभिरूप्यं वहन्ती
चरणजतुरसाङ्का हन्त चन्द्राननायाः ।
अनुपदमनुभूता सार्द्रतामत्यजन्ती
विलसति पदपङ्क्तिश्चन्द्रकान्तस्थलीषु ॥ ६ ॥

विदू— णेअं इत्थिआपदपंतिआ । किंदु, पडिणवमञ्जणापिञ्छिलीकिअसरणिणो णहरविवरणीसंदिलोहिअबिंदुणो जस्सकस्सावि सरारुणो विसरारुणो सत्तस्स । अण्णहा मह मुहविहुदंसणादोवि एत्थ पदपंतीए तह होदव्वं ।

[नेयं स्त्रीपदपङ्क्तिः । किन्तु, प्रतिनवमञ्जनपिच्छिलीकृतसरणेः नखरविवरनिष्यन्दिलोहितबिंदोः यस्यकस्यापि शरारोः विशरारोः सत्त्वस्य । अन्यथा मम मुखविधुदर्शनादपि अस्य पदपङ्क्त्या तथा भवितव्यम]

माध— (सस्मितं) यदि सखे त्वं चन्द्रवदनः ।

विदू— (सरोषं पश्यति)

माध— अपि तु [3]पुण्डरीकवदनः ।

विदू— (सकौतुकं पटाञ्चलेन मुखं परिमृजन्) दंसेदु आदंसं मह मुहसोंदेरं देट्ठुं ।

[दर्शयतु आदर्शम मम मुखसौन्दर्यं द्रष्टुम्]

माध— अयमादर्शः (इति दर्शयति)

---

1. दिसंति 'क' पाठः । 2. 'क' नास्ति । 3. पुण्डरीकपदं-व्याघ्रे पद्मे च श्लिष्टम् ।

विदू — (दर्पणे मुखं दृष्ट्वा सभयोत्कंपं) अविहा ! अविहा !! देव ! महंतो विध्धसद्दूलो मं खादेदुं विअ इदो दिण्णदिठ्ठी चिठ्ठइ । रक्ख! रक्ख!! ।

[अविध ! अविध !! देव ! महान् वृद्धशार्दूलो मां खादितुमिव इतो दत्तदृष्टिस्तिष्ठति । रक्ष ! रक्ष !!]

माध — वयस्य ! तमिममपसारयामि । [इति दर्पणं परिवर्तयति]

विदू — मोइदोम्हि होदा मुख्खसद्दूलमुहादो [मोचितोऽस्मि भवता मूर्खशार्दूलमुखात्] .

माध — दुष्टसत्त्वभूयिष्ठोऽयं प्रदेशः । झटिति गच्छावः । (इति परिक्रामति)

(नेपथ्ये)

"अहो ताए रुप्पिणीए माआ" [अहो ! तस्या रुक्मिण्या माया]

माध — (कर्णं दत्त्वा) इतो लतामण्डपे आलाप इव श्रूयते । (कतिचित्पदानि गत्वा, पुरोऽवलोक्य) एषा सात्राजिती मालतीमाधवीभ्यां लतागृहमध्यास्ते । आसां विस्रंभकथितानि लतान्तरितौ श्रोष्यावः । (इति विलोकयन् स्थितः)

(ततः प्रविशति यथोद्दिष्टव्यापारा सह सखीभ्यां सत्यभामा)

सत्यभामा — अहो ! ताए रुप्पिणीए माआ । अहो ! ताए रुप्पिणीए माआ । सहीओ ! तं एव्व पुणोवि कहणिज्जम् जं कण्णपरंपराए आअण्णिअम् ।

[अहो ! तस्या रुक्मिण्या माया ! अहो ! तस्या रुक्मिण्या माया ! सख्यौ ! तदेव पुनरपि कथनीयं, यत् कर्णपरंपरया आकर्णितम् ।]

मालती —

आलिहिअ चित्तफलए * रूपं देठ्ठूण रुप्पिणी तस्स ।
चुंबइ वअणं सविहे अवहरिओ झत्ति सोवि माआए ॥ ७ ॥
[आलिख्य चित्रफलके रूपं दृष्ट्वा रुक्मिणी तस्य ।
चुंबति वदनं सविधे अपहृतो झटिति सोऽपि मायया ॥

---

* रुप्पं 'क' पाठः

माधवी--

सहिओ मह पिअवअणं कदाणु पेक्खामि कंदिसीअविहु ।
एव्वं पाढिए सुअए किळ कहअंते पुणोवि ळज्जेइ ॥ ८ ॥

[सख्यो मम प्रियवदनं कदानु पश्यामि कान्दिशीकविधु ।
एवं पाठितेषु शुककेषु किल कथयत्सु पुनरपि लज्जते ॥]

सत्य-- सहिओ ! जुज्जइ जुज्जइ । सअळसंबरीसम्मज्जपट्टाहिसित्तो सोवि संबरो जेण जिओ, तस्सवि जदो सा पसूदी, ताए सहअसिद्धमअणचावळस्स माहवस्स वसिअरणं इसिअरं, जस्स बाळत्तणे वि गोवाळविळआणं थण्णपाणादो वि अहरपाणे* अहिळासो, आळोळिआदो वि रइकूइदे राअबंधो, कमळमुउळादो वि सिहिणमुउळे सिणेहो, तदो खु तेण वंचिएण तंवि विसुमरिदं ।

णीळत्थंभणिळीणो घणंधआरम्मि गूहणविहारे ।
जं गहिदो झत्ति मए मह करसंफंसरोमहरिसेहिं ॥ ९ ॥

अविअ ,

सव्वाणं विळआणसण्णिहिगओ ताहिं सअं पुच्छिदे
एदस्सिं जुवईजणे तुह कुदो राओत्ति सावेत्तरम् ।
जं दक्खिण्णवसेण तेण कहिअं सच्चाणुबंधं मगिं
मोत्तूण णिअमीरएमि वअणं सव्वोवि एसो समो ॥ १० ॥

[सख्यौ ! युज्यते युज्यते । सकलशंबरीसाम्राज्यपट्टाभिषिक्तस्सोऽपि शंबरो येन जितः, तस्यापि यतः प्रसूतिः, तया सहजसिद्धमदनचापलस्य माधवस्य वशीकरणं ईषत्करम् । यस्य बालत्वेऽपि गोपालविलासिनीनां स्तन्यपानादपि अधरपाने अभिलाषः, आलोलितादपि रतिकूजिते रागबंधः, कमलमुकुलादपि (स्तन)मुकुले स्नेहः । ततः खलु तेन वञ्चितेन तदपि विस्मृतम् —

नीलस्तंभनिलीनो घनांधकारे गूहनविहारे ।
यद्गृहीतो झटिति मया मम करसंस्पर्शरोमहर्षैः ॥

---

* बाणे 'क' पाठः

अपि च:—

सर्वासां विलयानां संनिधिगतः ताभिः स्वयं पृष्टः
एतस्मिन् युवतीजने तव कुतो राग इति शापोत्तरम् ।
यद्दाक्षिण्यवशेन तेन कथितं सत्यानुबद्धं मणिं
मुक्त्वा निजमीरयामि वचनं सर्वोऽप्येष समः ॥]

सख्यौ — साहु देवीए वअणं । साहु देवीए वअणं । [साधु देव्या वचनम् । साधु देव्या वचनम्]

सत्य — (सनिःश्वासम्) तहवि सा ण वअणिज्जा । जं सव्वोवि सकज्जे रज्जइ । एदंतु महंत चित्तं, जं एक्कअरपमोदस्स इदरजणस्स संदावकिदे पवुत्ती ।

[तथापि सा न वचनीया । यतस्सर्वोऽपि स्वकार्ये रज्यते । एतत्तु महत् चित्रं, यत् एकतरप्रमोदस्य इतरजनस्य संतापकृते प्रवृत्तिः ।]

विदू-- देव ! वसंतअस्सेत्ति *मंतव्वम् । [देव ! वसन्तकस्येति मन्तव्यम्]

माध-- नायमवसरो नर्मवचसाम् । पश्येदानीम् । सहजरमणीयस्य वस्तुनस्सर्वमप्यलङ्करणाय । यदुत--

नेत्रे रागमनल्पमाकलयत स्सोष्णः प्रमाणाधिको
निःश्वासस्स्तनकुड्मलं ग्लपयते न व्यक्तमस्या वचः ।
धत्ते भ्रूकुटिकोमलं मुखमिदं दोधूयमानं रुषा
कान्तिं कोकनदस्य मन्दपवनैरुद्भ्रान्तभृङ्गालिनः ॥ ११ ॥

किञ्च—

करयोः काञ्चनवलयाः कर्णद्वितये च कनकताटङ्के ।
एकावली च कंठे तन्व्यास्तन्वन्ति तादृशीं सुषमाम् ॥ १२ ॥

सत्य-- अलं तस्स सढस्स कहाएवि संदावआरिणीए । पेक्खह दाव सज्जो एव्व संदावहरं उज्जाणं । [अलं तस्य शठस्य कथयापि सन्तापकारिण्या । प्रेक्षत तावत् सद्य एव संतापहरं उद्यानम् ।]

* मं मंतव्वं 'क' पाठः ।

सख्यौ- दाणिंवि देवीए एदं ईदिसं होदि । किं उण माहवाअमे ? । [इदानीमपि देव्या एतदीदृशं भवति । किं पुनर्माधवागमे ?]

सत्य -- जइ एव्वं महंतं कोहळं मे हविस्सदि । [यद्येवं महत् कौतूहलं मे भविष्यति ।]

माध -- अयमेवात्मानं प्रकाशयितुमवसरः (इति विदूषकेण सह प्रविशति)

सख्यौ — (दृष्ट्वा ससंभ्रममुत्तिष्ठतः)

सत्यभामा —(तिर्यङ्मुखी तिष्ठति)

विदू -- देवि ! तुह चिंतासमकाळं एव्व संदावहरो अअं माहवो उवगओ ।

[देवि ! तव चिन्तासमकालमेव सन्तापहरोऽयं माधवः उपगतः ।]

सत्य --- (अवचना तिष्ठति)

माल — (जनान्तिकं) अंतरिदो एव्व सव्वं सुणिअ माहवसद्देण वंचिओ णाहो ।

[अन्तरित एव सर्वं श्रुत्वा माधवशब्देन वञ्चितो नाथः]

सत्य — (स्वगतं) कोव ! किअसंणाहो होहि । सो एसो अग्गदो उवगदो । (प्रकाशं) सहिओ ! एत्थ आअदाणं अह्माणं महंतो काळो गओ । गमिस्सं दाव घरअं (इति उत्थातुमिच्छति) [(स्वगतम्) कोप ! कृतसंनाहो भव । स एषः अग्रतः उपगतः । (प्रकाशं) सख्यौ ! अत्र आगतानामस्माकं महान् कालो गतः । गमिष्यामि तावद्गृहम् । इति उत्थातुमिच्छति)]

माध— अलमलमुत्थानसाहसेन ।

अयमहमपराधी नूनमायासहेतुः
कृशमपि तव मध्यं यत्पुनर्याति कार्श्यम् ।
अपि कुचकुलशैलावुन्नतावुन्नतत्वं
पृथुरपि घनभावं प्रेयसि ! श्रोणिबिंबः ॥ १३ ॥

सत्य-- (सरोषं सख्यौ प्रति) सच्चं एव्व पच्छण्णविचेट्ठा ऊहेदिव्वति । जं सअं एव्व अअं अहं अवराहिव्वति झत्ति णिग्गआ वाआ । [सत्यमेव प्रच्छन्नविचेष्टा ऊह्यत इति । यत् स्वयमेव अयमहमपराधीति झटिति निर्गता वाक्]

माध— (सत्यभामां प्रति) किमयमविदितारम्भः क्रोधसंरम्भः ?

अन्तर्दीप्यदमर्षपावकशिखालेलिह्यमानान्तरं
वक्त्रेन्दुं परितस्सुधारसकणा व्याकीर्यमाणा इव ।
भासन्ते तव भामिनीजनमणे ! घर्माम्भसां बिन्दव-
श्शीतांशूपलशीतलेऽप्युपवने प्रायेण शङ्कावहाः ॥ १४ ॥

अपिच—

मुक्तान्याभरणानि फाल[1]लिखिता कस्तूरिकाचर्चिका
वासो मानिनि ! मे विवेकसुषमापाटच्चरं कच्चरम् ।

(मध्ये सविचारमिव) आः ! ज्ञातम् ; असंशयमारामविहारेषु घनजघनकुचगौरवा-
दाविष्कृतेयं विक्रिया ।

आयासास्तविभूषणाऽस्युभयतो व्यावर्तनान्निस्सृतं
कस्तूरीतिलकं पटस्सुमनसां धूलीभरैर्धूसरः ॥ १५ ॥

सत्य— (तिर्यङ्मुखी तिष्ठति ।)

माधवः— (सख्यौ प्रति) किमेतदिति यूयं वा ब्रूत ।

माल— तुह्माणं पवुत्तिं तुह्मे एव्व जाणीह । का वअं ? [युष्माकं प्रवृत्तिं यूयमेव जानीथ । का वयम् ?]

सत्य — सहि ! माहवि ! असंबद्धप्पलाविणीए माळदीए ण किं (किअ) ममआअरणं ।
[सखि ! माधवि ! असंबद्धप्रलापिन्या मालत्या न किं (कृतं) ममयाचरणम् ।]

माधवी — देवि ! पडिवअणाणुबंधिणी खु पुच्छिआ । [देवि ! प्रतिवचनानुबंधिनी खलु पृच्छा ।]

सत्य — माहवि ! उइदे खु अणुओओ पच्चुत्तिआ पडि[2]वअणं । जदो सअळजणोपेक्खिदे तवस्सिजणे कोवारोवो ।

[माधवि ! उचिते खलु अनुयोगः प्रत्युक्तिका प्रतिवचनम् , यतः सकलजनोपेक्षिते

---

1. तिलके 'क' पाठः 2. 'वाअणं' ख पाठः

तपस्विजने कोपारोपः ।]

माधवः -- (कर्णौ पिधाय) देवि ! मा मैवं वादीः । यतः —

त्वत्कैङ्कर्ये त्वरितहृदयं षोडशस्त्रीसहस्रं
देवास्सर्वे शतमखमुखास्त्वत्कटाक्षप्रतीक्षाः ।
त्वत्प्रेयस्यस्त्रिदशवनिताः[1] पर्वतापत्यमुख्याः
नाथस्सोऽयं सकलजगतां नाथति त्वत्प्रसादम् ॥ १६ ॥

सत्य — माहवि ! पइट्ठं [2]सादरं भूओवि आवादेदुं अहिलसदि । ता झत्ति ओसरामो ।
[माधवि ! प्रकृष्टं स्वादरं भूयोऽपि आपादयितुं अभिलषति । तत् झटिति अपसरामः ।]
(इति गमनं नाटयति)

माधवः -- (लतागृहद्वारमावृत्य तिष्ठति)

सत्य — (विदूषकाभिमुखं तर्जनीं मुखे कृत्वा तर्जयति)

विदू — णाहं [3]अवराही । जो कोवि । [नाहमपराधी । यः कोऽपि]

माधवः — वैधेय ! किमेवं प्रलपसि ? (सत्यभामां प्रति सानुरोधं)

अभिनवमभिशापं सोऽहमीशे न सोढुं
गहनतलविहारी गन्धहस्तीव बन्धम् ।
विशदय मयि भावं वेदिमध्ये ! विधेये
पदमपि परधा त्वं नालमेकं निधातुम् ॥ १७ ॥

सत्य— सहिओ ! ताए णिओएण कलहकिदे एव्व एत्थ अअं आअदो । तुझे वदह—
" णासौ तवस्सिणी बलामोडिआणं विसओत्ति " ।
[सख्यौ ! तस्या नियोगेन कलहकृते एव अत्र अयं आगतः । युवां वदतं " नासौ तपस्विनी बलामोटितानां विषयः " इति ।]

1. 'वनितापर्वता' क पाठः 2. सादं 'ख' पाठः 3. अअराही 'क' पाठः

सख्यौ— देव ! दं अवि सुदं ? जं देवी आणवेदि । [देव इदं अपि श्रुतं? यद्देव्याज्ञापयति ।]

माधवः— धिगेतं मम बलदुरवलेपम् ।

तन्वीं त्वामवलंब्य सोऽयमबलां बालां बलात् कोमलै-
र्द्वित्रैरेव पतत्रिभिर्विदलयत्यङ्गान्यनङ्गो मम ।
बाणैर्यस्य धनुश्च्युतैस्सह गणैर्बाणाहवे निर्जितः
साक्षाद्दक्षसुतापति र्निजवपुस्सन्तापकालानलः ॥ १८ ॥

सत्य— जस्स खणमेत्तविओअकाळणादो अस्स ईदिसो अणुदावो, णिच्चजोवणं अमाणुस-सुळहगंधाहिवासिअं अप्पपसंसाणुमोदिअं परदूसणाणिव्वुदं वल्लहवसीअरणकुसळं तं जणं मोत्तूण समाअओ ।

[यस्य क्षणमात्रवियोगकारणात् अस्य ईदृशोऽनुतापः, नित्ययौवनं अमानुष-सुलभगंधाधिवासितं आत्मप्रशंसानुमोदितं परदूषणानिर्वृतं वल्लभवशीकरणकुशलं तं जनं मुक्त्वा समागतः ।]

विदू— (जनान्तिकं) वअस्स ! फुरइ मे रसणा किंवि कहेदुं ।

[वयस्य ! स्फुरति मे रसना किमपि कथयितुम्]

माधवः—(स्वगतं) अयमप्यपरो नारदः (प्रकाशम्) [1]एतादृग्गुणरमणीया का पुनरन्या वर्तते । इमामन्तरेण सर्वावयवाभिरामां सत्यभामाम् ।

सत्य— सहिओ ! सव्वं [2]सुणुह ।णूणं अहंवि अत्तगंधा । जदो गंधवत्थुविस्साणणकाळे जहकहं वि अहं विसुमरिदा ।

[सख्यौ ! सर्वं शृणुतं । नूनं अहमपि आत्तगंधा । यतो गंधवस्तुविश्राणनकाले यथा-कथमपि अहं विस्मृता ।]

माधवः— ध्वनिप्रधानवचनान्यध्वनीनानि कर्णयोः ।
तपन्ति[3] तरलापाङ्गे ! मामारोप्य मलिम्लुचम् ॥ १९ ॥

---

1. तादृशा गुण इति 'क' पाठः । 2. चिण्ठउ 'ख' पाठः । 3. पतन्ति 'क' पाठः

सत्य — सहिओ ! एस विसुद्धो विअ [1]हुविअ किळंमइ दामोदओ ।
[सख्यौ ! एष विशुद्ध इव भूत्वा क्लाम्यति दामोदरः ।]

सख्यौ — (माधवमभि स्मितं कुरुतः)

विदू — (जनान्तिकं) देव ! एत्थ किंवा जुत्तं पडिवअणं ? [देव ! अत्र किंवा युक्तं प्रतिवचनम् ?]

माधवः — (सत्यभामां प्रति प्रकाशम्) किमिदं कथ्यते मम बालचापलम् ? सर्वोऽपि स्वस्वदोषं न पश्यति । यतः —

वक्त्रश्चेदयि ! वञ्चितेन्दुवलयं मायामयं मध्यमं
वक्षोजौ वनजाक्षि ! किञ्च हरतो लक्ष्मीं कुलक्ष्माभृतोः ।
पादश्चोरयते पयोजसुषमां पाणिः प्रवाळश्रियं
मुष्णाति स्वयमेष वृष्णितिलको हन्त ! त्वया चोरितः ॥ २० ॥

सत्य — सहिओ ! इअंवि अण्णा वंचणा । एव्वंति अविण्णाअ अण्णपसंगामरिसिणी हिअअ-मंणिहिआ रुप्पिणी कुप्पेइ ।
[सख्यौ ! इयमपि अन्या वञ्चना । एवमित्यविज्ञाय अन्यप्रसङ्गामर्षिणी हृदय-संनिहिता रुक्मिणी कुप्यति ।]

माधवः —

कथयसि कथमेवं कंबुकण्ठि ! स्वयं मां
मनसि मनसिजार्तं सन्ततं वर्तमाना ।
सुखितनिखिललोका शारदी चन्द्रलेखा
वियति तिमिरवार्तां किन्नु शङ्केत जातु ? ॥ २१ ॥

सत्य — सो काळो गओ । अअंवि अण्णो —

सच्चं सच्चं ण पिअसहिओ ! सा इअं सच्चभामा
जादोवेक्खा जइ रमणदो किंणु जीवेइ जादु ।

---

1. भविअ 'ख' पाठः ।

(सनि:श्वासं)

एसो णो सो जइ जउवई ईरिसो होदि किंवा
जम्मिं राओ भुवणविइओ जीवदो पेअदोवि ॥ २२ ॥

[स कालो गतः । अयमप्यन्यः ।

सत्यं सत्यं न प्रियमख्यौ मेयं सत्यभामा
जातोपेक्षा यदि रमणतः किन्नु जीवति जातु ।

(सनि:श्वासम्)

एष नो स यदि यदुपतिरीदृशो भवति किं वा
यस्मिन् रागो भुवनविदितः .... ॥]

माधवः — नातिचिरविश्लेषणादप्येवं वदसि नूनम् —

मन्ये माध्यमिकं मध्यभागेन तव भामिनि ।
अङ्गीकृतं त्वयान्यच्च सकलं सौगतं मतम् ॥ २३ ॥

सत्य — सहिओ! अम्म कळहकळाविसारदादो णारदादो अत्तविज्जाविसेसोवदेसेण अज्ज मज्झ वअणाणि अरमणिज्जाणि कहं णहोंति ?। ताए एव्व सव्वह्मआरिणीए वअणाणि रोअंति । ताए एव्व उइदो समाअमो गच्छउ ।

[सख्यौ ! अस्य कलहकलाविशारदात् नारदात् आत्मविद्याविशेषोपदेशेन अद्य मम वचनानि अरमणीयानि कथं न भवन्ति ? तस्या एव सब्रह्मचारिण्याः वचनानि रोचन्ते । तयैव उचितः समागमः ; गच्छतु ।]

विदूष — (अपवार्य) देव! दिट्ठिआ अकिलेसपसंगं मोइदं म्ह इमादो संकडादो । झत्ति ओसरामो ।

[देव! दिष्टया अक्लेशप्रसंगं मोचिताः स्मोऽस्मात् संकटात् । झटित्यपसरामः ।]

माधवः — (अश्रुतिमभिनीय सत्यभामां प्रति)

निष्कारणमणुमध्ये ! निष्कासवचांसि कथमिह ब्रूषे ।
सर्वत्र वर्तसे त्वं बहिरन्तरपि त्वया तु दासजनः ॥ २४ ॥

सत्य — पारिआअकुसुमपरिमळाहिवासिए अण्णपसंगासहणे तस्सिं एव्व घरम्मि ।
[पारिजातकुसुमपरिमलाधिवासिते अन्यप्रसंगासहने तस्मिन्नेव गृहे ।]

मालती— (सस्मितं जनान्तिकं) माहवि ! अहो ! देवीए [1]णेउणं, जं कहाणुकहणेण पारिआअसुमनपसंगो पसंजिदो । (प्रकाशं) देव ! अवि गहिदो देवीवाआणं पिंडिदत्थो ? ।
[(सस्मितं जनान्तिकं) माधवि ! अहो ! देव्या नैपुणम्, यत् कथानुकथनेन पारिजात-सुमनःप्रसंगः प्रसञ्जितः । (प्रकाशं) देव अपि गृहीतो देवीवाचां पिण्डितार्थः ?]

विदू— (अपवार्य) देव ! पव्व[2]विइंभिअसरस्संतो विअ से अमरिसो जिंभइ । अस्स कोवा परिवाहो ।
[(अपवार्य) देव ! पर्वविजृंभितसरस्वानिवास्याः अमर्षो जृंभते । अस्य कोवा परिवाहः?]

माधवः — नारदेन रुक्मिण्यै दत्तमिति कथयामि ।

विदू— जइ दासीए [3]उत्तओ करट्ठिओ सवं[4]धिणी रज्जूविअ पारिआअपरिमलो पिसुणो ण भवे ? । ता्ळा तह कहणिज्जम ।
[यदि दास्याः पुत्रः करस्थितः सबंधिना रज्जुरिव पारिजातपरिमलः पिशुनो न भवेत् ? तदा तथा कथनीयम्]

माधवः — तर्हि चमत्करोमि । पश्य पश्य । (प्रकाशं) (चिन्तां नाटयित्वा) आः ! परिज्ञातं । परिजातप्रसूनं रुक्मिण्योपलब्धमित्येतावदेवावगतमनया । न पुनरिदं मानुपूर्वि । अन्यथा कथमयमत्यमर्षः ?

सख्यौ — सव्वं सुदं अह्मेहिं । णारअहत्थादो गह्निअ रुप्पिणीए अप्पिदंति ।
[सर्वं श्रुतं अस्माभिः, नारदहस्तात गृहीत्वा रुक्मिण्यै अर्पितमिति]

सत्य— (सख्यौ प्रति सभ्रूभंगं) किंति तुह्मे पळवह ? जह णारएण कहिअं तह एव्व पाणवल्लहाए एव्व पडिवाइए पारिआए ।

---

1. णेउण्णं 'क' पाठः । 2. विइंभंत 'ख' पाठः । 3. पुत्तओ 'ख' पाठः । 4. सवंधिणू 'क' पाठः ।

[किमिति युवां प्रलपथः ? यथा नारदेन कथितं तथैव प्राणवल्लभाया एव प्रतिपादितं पारिजातम्]

विदू— (जनान्तिकम्) मह वि चमक्कारं पेक्ख । (प्रकाशं) णखु णखु । सहीहिं गहिदा आणुपुव्वी इअं एव्व । (इति चरमाङ्गुलिकां दर्शयति) ।

[(जनान्तिकं) ममापि चमत्कारं पश्य ! (प्रकाश) न खलु न खलु, सखीभ्यां गृहीता आनुपूर्वी इयमेव (इति चरमाङ्गुलिकां दर्शयति)]

सख्यौ— किं एदं ? [किमेतत् ?]

माधवः— (स्वगतं) चतुरोऽयं वटुः । (प्रकाशं) द्यूतपणीकृतं पारिजात[1]मपारिजाते मय्यादित्सौ तया कृतं स्वैकृतं दर्शयति ।

सत्य— काळत्तअवेदिणा तत्थहोदा णेण पारिआआ[2]अमणादो पुरव्व एव्वं [3]किदं (इत्युदीर्य) अणिअवादी तुमं सज्जो फळं अणुहविस्सासि (इति विदूषकं सभ्रूक्षेपं तर्जयति)

[कालत्रयवेदिना तत्रभवता अनेन पारिजातागमनात्पुरैव एवं कृतं । (इत्युदीर्य) अनृतवादी त्वं सद्यः फलमनुभविष्यसि (इति विदूषकं सभ्रूक्षेपं तर्जयति)]

